श्रीमहागणपति नवार्ण वेदपादस्तवः

{॥ श्रीमहागणपति नवार्ण वेदपादस्तवः ॥}

This hymn or stotra has a peculiar structure. Each of the verses has a letter from the Mahaganapati mantram (viz) श्रीमहागणपतये नमः । Shrimahaganapataye namaha (namana) in the beginning. In addition they also have a line from the Vedas in the second half of the second line. For example, in the case of the first verse the portion reading shriya.n vAsaya me kule । श्रियं वासय मे कुले । is a sentence from the Shrisuktam from the Vedas.

श्रीकण्ठतनय श्रीश श्रीकर श्रीदलार्चित ।
श्रीविनायक सर्वेश श्रियं वासय मे कुले ॥ १॥

गजानन गणाधीश द्विजराज-विभूषित ।
भजे त्वां सच्चिदानन्द ब्रह्मणां ब्रह्मणास्पते ॥ २॥

णषाष्ठ-वाच्य-नाशाय रोगाट-विकुठारिणे ।
घृणा-पालित-लोकाय वनानां पतये नमः ॥ ३॥

धियं प्रयच्छते तुभ्यमीप्सितार्थ-प्रदायिने ।
दीप्त-भूषण-भूषाय दिशां च पतये नमः ॥ ४॥

पञ्च-ब्रह्म-स्वरूपाय पञ्च-पातक-हारिणे ।

पञ्च-तत्त्वात्मने तुभ्यं पशूनां पतये नमः ॥ ५॥

तटित्कोटि-प्रतीकाश-तनवे विश्व-साक्षिणे ।

तपस्वि-ध्यायिने तुभ्यं सेनानिभ्यश्च वो नमः ॥ ६॥

ये भजन्त्यक्षरं त्वां ते प्राप्नुवन्त्यक्षरात्मताम्।

नैकरूपाय महते मुष्णतां पतये नमः ॥ ७॥

नगजा-वर-पुत्राय सुर-राजार्चिताय च ।

सुगुणाय नमस्तुभ्यं सुमृडीकाय मीढुषे ॥ ८॥

महा-पातक-सङ्घात-तम-हारण-भयापह ।

त्वदीय-कृपया देव सर्वानव यजामहे ॥ ९॥

नवार्ण-रत्न-निगम-पाद-संपुटितां स्तुतिम् ।

भक्त्या पठन्ति ये तेषां तुष्टो भव गणाधिप ॥ १०॥

॥ इति श्रीमहागणपति-नवार्ण-वेदपाद-स्तवः समप्तः॥

Encoded and proofread by N.Balasubramanian bbalu at sify.com

Please send corrections to sanskrit@cheerful.com

Last updated तoday

http://sanskritdocuments.org

Maha Ganapathi Navarna Vedapada Stavam Lyrics in Devanagari PDF
% File name : mahAgaNapatinavArNavedapAdastava.itx
% Location : doc_ganesha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at satyam.net.in
% Proofread by : N.Balasubramanian bbalu at satyam.net.in
% Latest update : May 16, 2011
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website